# Shrimat Tilakashtakam

# શ્રીમત્તિલકાષ્ટકમ્

## Document Information

Text title : tilakAShTakam

File name : tilakAShTakam.itx

Category : misc, aShTaka

Location : doc_z_misc_general

Author : Dattatreya Anant Apte

Transliterated by : Vinayaranjan Ambatkar

Proofread by : Vinayaranjan Ambatkar, NA

Description/comments : Hridayataranga 3. Praise of Bal Gangadhar Tilak

Latest update : May 1, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 8, 2021

*sanskritdocuments.org*

# શ્રીમત્તિલકાષ્ટકમ્

(વૃત્તં-ભુજઙ્ગપ્રયાતમ્)

ધનશ્યામલં શારદાકણ્ઠરત્નં
    ગુણાઢ્યં વદાન્યં પરં લોકમાન્યમ્ ।
ગણેશં જપન્તં પ્રશાન્તસ્વરૂપં
    ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૧॥

સ્વદેશવ્રતં પૂર્ણભક્ત્યા ચરન્તં
    ધૃતં યેન હસ્તે બહિષ્કારશસ્ત્રમ્ ।
પ્રસન્નં તથા ચૈકપત્નીવ્રતસ્થં
    ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૨॥

મહાપણ્ડિતં નિઃસ્પૃહં વીતરાગં
    લસદીપ્તિમન્તં જ્વલત્કર્મસક્તમ્ ।
મહારાષ્ટ્ર ગીર્વાણભાષાપ્રવીણં
    ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૩॥

મહારાષ્ટ્રભૂપ્રાણસઞ્જીવનં તં
    સદારાજનીતિવ્રતવ્યગ્રચિત્તમ્ ।
તનબુદ્ધિજેતારમાનન્દકન્દં
    ભજે દેશભક્તં મુદા વાલરાજમ્ ॥ ૪॥

ન મેષા વયં સુપ્તવોર્યાસ્તુ સિંહાઃ
    સ્વકીયાતબન્ધૂનિદં સમ્પ્રવક્તુમ્ ।
લિખન્તં શ્રુતં 'કેસરી' વૃત્તપત્રં
    ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૫॥

સ્વકીયં મતં નિઃસ્પૃહં નિશ્ચિતં યો
    નૃપસ્યાગ્રતોઽપિ બ્રુવન્નો બિભેતિ ।
વિશુદ્ધં પ્રબુદ્ધં ચ સત્યવ્રતં તં

ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૬॥

સુરાપાનસક્તાન્સ્વબન્ધૂન્નિરીક્ષ્ય
સ્વચિત્તે ભૃશં યો વિષણ્ણો બભૂવ ।
કૃતો યેન યત્નોઽનિશં તદ્ધિતાય
ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૭॥

વ્રતં સ્વીકૃતં નિર્મલ પાલનાય
સહિત્વા સદા કેશભારં પ્રભૂતમ્ ।
કૃતં બન્દિવાસસ્થલં યેન પૂતં
ભજે દેશભક્તં મુદા બાલરાજમ્ ॥ ૮॥

ઇદં દેશભક્તસ્ય પુણ્યં ચારીત્રં
સ્વદૃષ્ટેઃ પુરસ્તાત્સદા યો નિધાય ।
તથા વર્તમાનો જનો લોકમાન્યો
હિતં શાશ્વતં દેશભૂમેઃ સ કુર્યાત્ ॥ ૯॥

ઇતિ શ્રીમત્તિલકાષ્ટકં સમ્પૂર્ણમ્ ।

Hrudayataranga by Dattatreya Anant Apte, 1955

Encoded and proofread by Vinayaranjan Ambatkar

*Shrimat Tilakashtakam*
pdf was typeset on September 8, 2021

Please send corrections to *sanskrit@cheerful.com*